दशकुमारचरित्रपूर्वपीठिका

~~[illegible]~~

२५७

[illegible]

॥ दशकुमारपूर्वपीठिका [illegible] ॰ तेन स्वपठनार्थे लिखापिता

पत्र ३२

॥ इदं पुस्तकं उदयचन्द्रस्य स्वपठना[illegible] ॥

६

नं० २३६५

दश०कु ॥श्रीगणेशाय नमः॥ ब्रह्मांडछत्रदंडः शतधृतिभवनांभोरुहो नालदंडः क्षोणीनौकूपदंडः क्षरदमरसरित्पट्टिका
१ केतुदंडः ज्योतिश्चक्राक्षदंडस्त्रिभुवनविजयस्तंभदंडोंघ्रिदंडः श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां काल
दंडः १ अस्ति समस्तनगरीनिकषायमाणा शश्वदगण्यपण्यविस्तारितमणिगणादिवस्तुजातव्याख्यातर
त्नाकरमाहात्म्या मगधदेशशेखरीभूता पुष्पपुरी नाम नगरी तत्र वीरभटपटलोत्तरंगतुरंगकुंजरमकरभीषण
सकलरिपुगणकटकजलनिधिमथनमंदरायमाणसमुद्दंडभुजदंडः पुरंदरपुरांगणवनविहारपरायण
गीर्वाणतरुणगणिकाजनजेगीयमानयातिमानया शरदिंदुकुंदघनसारनीहारहारमृणालमरालसुर
गजनीरक्षीरगिरिशाट्टहासकैलासकाशनीकाशमूर्त्या रचितदिगंतरालपूर्त्या कीर्त्या अभितः सुरभितः स्वर्लोक राम०
शिखरोरुरुचिररत्नाकरवेलामेखलावलयितधरणीरमणीसौभाग्यभोगभाग्यवाननवरतयागदक्षिणारक्षि १

ताशिष्टविशिष्टविद्यासंभारभासुरभूसुरनिकरो विरचितारातिसंतापेन प्रतापेन सतततुलितवियन्म
ध्यहंसो राजहंसो नाम घनदर्पकंदर्पसौंदर्यसोदर्यहृद्यनिरवद्यरूपो भूपो बभूव तस्य वसुमती नाम सुमती
लीलावतीकुलशेखरमणी रमणी बभूव रोषरूक्षेण निटिलाक्षेण भस्मीकृतचेतनेन मकरकेतनेन तदा भये
नावध्या वनितेति मत्वा तस्या रोलंबावली केशजालं प्रेमाकरो रजनीकरो विजितारविंदवदनं जयध्वजायमानो
मीनो जायायुतोऽक्षियुगलं सकलसैनिकांगरागो मलयसमीरो निश्वासः पथिकहृद्दलनकरवालः प्रवाल
स्त्राधरबिंबं जयशंखो बंधुरा लावण्यधरा कंधरा पूर्णकुंभौ चक्रवाकानुकारौ पयोधरौ ज्यायमाने मार्दवासमा
ने बिसलते बाहू ईषदुत्फुल्ललीलावतंसकह्लारकोरकं गांगावर्तसनाभिर्नाभिर्दूरीकृतयोगिमनोरथो जैत्ररथो नि
घनं जयस्तंभभूते सौंदर्यभूते विघ्नितयतिजनारंभे रंभे चोरुयुगं आतपत्रसहस्रपत्रं पादद्वयमस्त्रभूतानि प्रसूनानि

द॰पू॰ नातीतराजन्यगणानिव समभूवन्निव । निर्जितामरपुरे पुष्पपुरे निवसता नंतभोगलालिता वसुमती वसुमती मगध
१ राजेन यथासुखमन्वभावि तस्य राज्ञः परमविधेया धर्मपालपद्मोद्भवसितवर्मनामधेया धीरधीषणावधी
रित विबुधाचार्यविचार्यकार्यसाहित्याः कुलामात्यास्त्रयोऽभूवन् तेषां सितवर्मणः सुमतिसत्यवर्माणौ
धर्मपालस्य सुमंत्रसुमित्रकामपालाः पद्मोद्भवस्य सुश्रुतरत्नोद्भवाविति तनयाः समभूवन् तेषु धर्मशी
लः सत्यवर्मा संसारासारतां बुद्ध्वा तीर्थयात्राभिलाषी देशांतरमगमत् विटनटवारनारीपरायणो दुर्विनी
तः कामपालो जनकाग्रजन्मनोः शासनमतिक्रम्य भुवं बभ्राम । रत्नोद्भवोऽपि वाणिज्यनिपुणतया पारा
वारतरणमकरोत् इतरे मंत्रिसूनवः पुरंदरपुरातिथिषु पितृषु यथापूर्वमन्वतिष्ठन् ततः कदाचिन्नानावि राम॰
धमहदायुधनैपुण्यरचितागण्यजन्यराजन्यमौलिपालिनिहितनिशितसायको मगधनायको मालवेश्वरं १

ब्रेत्युग्रसंग्राममदघस्मरं समुत्करमानसारे उतिसहेलं न्यक्कृतजलनिधिनिर्घोषाहंकारेण भेरीभांकारेण हठिकाक
र्णिताकर्णान्तभयचंडिमानं दिगंतावलंबवलयं विघूर्णायद्विजमरतमत्मेदिनीभरणायस्तभुजगराजमस्तकवले
नचलत्तुरंगबलेन संयुतः संग्रामाभिलाषेण रोषेण महता विशेनिर्ययौ मालवनाथोऽप्यनेकानेकपयूथसनाथो
विग्रहः सविग्रह इव साग्रहोऽभिमुखीभूय भूयो निर्जगाम तयोरथ रथतुरगखुरक्षुण्णक्षोणीसमुद्भूते करि
घटाकटस्रवन्मदधाराधौतमूले नभोवल्लभरणागते दिव्यकन्याजनजवनिकापटमंडल इव विपन्नलक्ष्याकु
ले धूलीपटले दिविषद्ध्वनिधिक्कृतानध्वनिपटहध्वानबधिरिताशेषदिगंतराले शस्त्राशस्त्रि हस्ताहस्ति परस
राभिहतसैन्यं जन्यमजनि तत्र मगधराजः प्रक्षीणसकलसैन्यमंडलं मालवराजं जीवग्राहमभिगृह्य कृपालुतया
पुनरपि स्वराज्ये प्रतिष्ठापयामास ततः स रत्नाकरमेखलामिलामनन्यशासनां शासदनपत्यतया नारायणं सक

र०प्र० तल्लोकेककारागांनिरंतरमर्चयामास अथ कदाचित्तदग्रमहिषी देवी देवेन कल्पवल्लीफलमादेहीतिप्रभात
३ समयेस्वप्नमवलोकितवती सातदादयितमनोरथपुष्पभृतंगर्भमधत्त राजापिसंपन्नच्छत्ताखंडलःस्त
3 त्तन्नृपमंडलंममाहृयनिजसंपन्मनोरथानुरूपंदेव्याःसीमंतमहोत्सवंवाधत्त एकदाऽऽहूतैःस्तत्त्वांत्रि
पुरोहितैःसभायांसभायांसिंहासनासीनोगुणौरहीनोललाटतटन्यस्तांजलिनाद्वारपालेनव्यज्ञापिदेवःदे
वस्यदर्शनलालसमानसःकोपिदेवेनविरच्याचनाह्वीयतिद्वारदेशमध्यास्तइति तदनुज्ञातेनतेनसंस
यमीनृपसमीपमनायि भूपतिरायांतंविलोक्यसम्यक्ज्ञाततदीयगूढचारभावोनिखिलमनुचरनिक
रोविसृज्यमंत्रिजनसमेतःप्रणामंतमेनंमंदहासमभाषत नत्तापसदेशंसापदेशंप्रमन्ये भवांस्तत्तत्त्वमवदमि राम०
ज्ञातंकथयत्विति तेनाभाषि भूभ्रमणगलितानांजलिनादेवशिरसिदेवस्याज्ञामादायैतंनिर्दोषवेषंस्वीकृ २

त्यमालवेंद्रनगरं प्रविश्य तत्र गूढतरं वर्त्तमानस्तस्य राज्ञः समस्तमुदंतं ज्ञातेविदित्वा प्रत्यागमे मानीमानसारः
स्वसैनिकायुष्मत्तां तेनाये संपराये भवतः पराजयमनुभूय वैलक्ष्यलक्ष्यहृदयो वीतदयो महाकालनिवासि
नं कालीविलासिनमनश्वरं समाराध्य तपःप्रभावसंतुष्टादस्मादेकवीरारातिघ्नीं भयदां गदां लब्ध्वात्मान
मप्रतिभटं मन्यमानो महाभिमानो भवंतमभियोक्तुमुद्युंक्ते ततः परं देव एव प्रमाणमिति तदालोच्य निश्चि
तकृत्यैरमात्यै राजा विज्ञापितोऽभूत देव निरूपायेन देवसहायेन योद्धुमरातिरायाति तस्मादस्माकं यु
द्धं सांप्रतमसांप्रतं सहसा दुर्गसंश्रयः क्रियतामिति तैर्बहुधा विज्ञापितोप्यखर्वेण गर्वेण विराजमानो रा
जा तद्वाक्यमकृत्यमित्यनादृत्य प्रतियोद्धुमनाबभूव शितिकंठदत्तशक्तिसारो मानसारो मानसारो योद्धुमन
सामग्रीभूयसामग्रीसमेतोऽक्लेशं मगधदेशं प्रविवेश तदा तदाकर्ण्य मंत्रिणो भूमहेंद्रं मगधेंद्रं कथंचिदनुनी

परितुमिरसाध्वोविंध्याटवीमध्येवरोधान्मूलबलरक्षितान्विनिवेशयामासुः राजहंसस्तुप्रशस्तवीतदैन्यसमे
तस्तीव्रगत्यानिर्गत्याधिकरुषंद्विषंरुरोध परस्परबद्धवैरयोरेतयोःशूरयोस्तदातदालोकनकुतूहलागतग
गनचराश्चर्यकारणेरणेवर्त्तमानेजयकांक्षीमालवदेशरक्षीविविधायुधस्थैर्यचर्योचितसमराकुलितामरेश्व
रस्यमगधेश्वरस्यतस्योपरिरुषापुरारातिदत्तांगदांप्राहिणोत् निशितशरनिकरशकलीकृतापिसापशुपति
शासनस्याबध्यतयासूतंनिहत्यरथस्थंराजानंमूर्छितमकार्षीत् ततोवीतप्रग्रहाअश्वाःतंविग्रहाद्विहायरथ
मादायदैवगत्यान्तःपुरशरण्यंमहारण्यंप्राविशन् मालवनाथोजयलक्ष्मीसनाथोमगधराज्यंप्राज्यंसमा
क्रम्यपुष्पपुरमध्यतिष्ठत् हेतिततिहतिश्रांताश्चामात्यादैवगत्याप्रत्युत्क्रांतजीवितानिशांतवातलब्धसंज्ञाः
कथंचिदाश्वस्याराजानंसमंतादन्विष्यानवलोकितवंतोदैन्यवंतोदेवीमवापुः वसुमतीतुतेभ्योनिखिलसै

न्यक्कृतिं राज्ञोः हृदयं त्वं वा कार्योऽहि ग्राशोकमामरम ग्रारमणानुमरणे मतिं व्यधत्त कल्याणि भूरमणामरणा
परणामनिश्चितं किंत्व देवज्ञ कथितो माथितो हताशा इतिः मा वं भो मो भिरामो भविता स्त कुमारः कुमारः त्व दुद
रेव सतितस्माद्द्यान वमरणामनुचितमिति भूषितमाषितैरमात्यपुरोहितैरनुनीयमानया तयाकृच्छ्रगाऽकृशाङ्गी
तया तूष्णीमस्थायि अथाहं गाढानिद्रानिलीढे नैपरिजने विजने शोकपारावारमपारमुत्तर्तुमशक्नुवंती से
नातिवेशादेशं विशङ्कहृल्लेखं शनैरतिक्रम्य पश्चिमद्वारस्थस्य संसक्तया नन्दानपतनपलाय नश्रान्ताऽगात्तुमसृमाकृ
माणितरथ्याः पथ्याकुलाः पूर्वमतिष्ठन् तस्य निकटवटतरोः शाखायां मृतिरेखायामिव कञ्चिदुत्तरीयार्धं न
वं धनं तृणमिव साधनं विरच्य मत्तुं कामाऽभिरामा वासस्था धुरीविरमीत्कानकलकं गमाश्रुकंठावपलपन्त लावण्ये
पामितपुष्पसायकभूनायक भगवनेव भाविन्यपि जन्मनि त्वमेव भर्ता भवेति तदाकरार्यनीहारकरकिरणनिकर

द॰ पू॰ ५ संपर्केण लब्धावबोधो मागधोऽगाधरुधिरविक्षरणनष्टचेष्टो देवीवाक्यमेव निश्चित्यानन्तव्यानप्रियवचनानि शनैःसमा
माह्वयत् सा संभ्रममागम्यामंदहृदयानंदसंफुल्लवदनारविंदा तनुपोषिताभ्यामिवानिमिषिताभ्यां लोचना
भ्यां मन्मथविकलस्वरेणात्तरेणाश्रुरोहितामात्यजनमुखैराह्वयते भ्यस्तमदर्शयत् राज्ञा निरिक्षितनते च्चुंबितनिज
चरणांवुजे प्रशंसितदैवमाहात्म्यो रमात्यैरभागादेवरथ्यस्त्वयः सारथ्यपगमे रथं रभसादरण्यमनयदिति त
त्रविहृतसैनिकग्रामे संग्रामे मालवपतिनाऽऽराधितपुरारातिना प्रहितया गदया विहीनेन ताडितो मूर्छामा
गत्य निशांतपवनेन लब्धबोधितोऽभवमिति महीपतिरकथयत् ततो विरचितमहेन मंत्रिनिवहेन विरचितदेवानु
ज्ञल्पेन कालेन शिबिरमानीयापनीताशेषशल्यो विकासितनिजाननारविंदो राजहंसो विरोपितव्रणो कारि राम॰
विरोधिदैवधिक्कृतपुरुषकारो दैन्यव्याप्ताकारो मगधाधिपतिरधिकाधिरमात्यसंमत्या मृदुभाषितया तया वसु ५

5

मतामवकलितयाममवाधि देवसकलभूपालकुलस्य मध्ये तेजोवरिष्ठो गरिष्ठो भवानघवनमध्यं निवसतीति
जलबुद्बुदसमानाविराजमानासंपत्तडिल्लतेव झटित्येवोदयास्तनशालिनीच तन्निखिलं दैवायत्तमेवावधार्य कार्यं किं वसु
राहरिश्चंद्ररामचंद्रप्रमुख्यानसंख्यानमहींद्रान्गोस्मुर्यीपगितमहं दृष्टा देवतंत्रं दुःखयंत्रंसम्पागतं भूपपश्चादनेकका
लं निजराज्यमकुर्वन् तद्देवभवान्भविष्यतिकंचनकालं विरचितदेवसमाक्षिर्गीलिता क्षितिष्ठतु तावदिति ।
ततःसकलसैन्यसमन्वितोराजहंसस्तपोविभ्राजमानं वामदेवनामानं तपोधनं निजाभिलाषावाप्तिसाधनं तं
जगाम तं प्रणम्य तेन कृतातिथ्यस्तस्मै कथितकथस्तदाश्रमे दूरीकृतश्रमे कंचनकालमुषित्वा निजराज्या
भिलाषां सोमकुलावतंसो राजहंसो मुनिमभाषत भगवन्मानसारः प्रबलेन दैववलेन मां निर्जित्य मद्राज्यं राज्य
मनुभवति तदहमप्युग्रं तपो विरच्य तमरातिमुन्मूलयिष्यामि लोकशरण्येन भवत्कारुण्येनेति नियमवंतं भवंतं प्रा

द॰पू॰ ध्रुवमिति ततस्त्रिकालज्ञस्तपोधनो राजानमवोचत् सर्वेशरीरकार्श्यकारिणा तपसालं वसुमतीगर्भस्थः सक
९ लरिपुकुलमर्द्दनो राजनंदनो नूनं संभविष्यति कंचनकालं तूष्णीमास्स्वेति गगनचारिण्यापि वाण्या सत्यमेतदि
6 तितदेवावादि राजापि मुनिवाक्यमङ्गीकृत्यातिष्ठत ततः संपूर्णगर्भदिवसा वसुमती सुमुहूर्त्ते सकललक्षण
लक्षितं सुतमसूत ब्रह्मवर्चसेन तुलितवेधसं पुरोधसं पुरस्कृत्य कृत्यविन्महीपतिः कुमारं सुकुमारं जातसं
स्कारेण बालालंकारेण च विराजमानं राजवाहननामानं व्यधत्त तस्मिन्नेव काले सुमति सुमंत्र सुमित्र सु
श्रुतानां मंत्रिणां प्रमति मित्रगुप्त मंत्रगुप्त विश्रुताख्या महदभिख्याः सूनवो नवोद्यदिंदुरुचश्चिरायुषः समजाय
न्त राजवाहनो मंत्रिपुत्रैरात्ममित्रैः सह बालकेलीरनुभवन्नवर्द्धत कदाचिदेकेन तापसेन रसेन राजलक्षणविरा राम॰
जितं कंचिन्नयनानंदकरं सुकुमारं कुमारं राज्ञे समर्प्यावोचि भूवल्लभ कुशसमिदानयनाय वनं गतेन मया का ९

दशारणपात्वक्ककापरार्णोऽश्रुमुंचती युवती विलोकिता निर्जने वने । किन्निमित्ते – इतेत्तयेतिरुष्टा साकारुहे रश्रु
प्रमृज्य मगद्गदं मामवोचत् मुने लावण्यजितपुष्पसायके मिथिलानायके कीर्त्तिध्वजे तप्रहारवर्मणि निजसुहृ
दो मगधराजस्य । सीमंतिनीसीमंतमहोत्सवाय पुत्रदारसमन्विते पुष्पपुरमुपेत्य कंचन कालमधिवसति समाराधि
तगिरिशो मालवाधीशो मगधराजं योद्धुमभ्यगात् तत्रप्रवृत्तयोरेतयो रस्तुरख्येमंल्येवर्त्तमाने स्तुहस्ताहाप्यं
कुर्वाणो निजबलेऽसति विधेये विदेहेश्वरो जयचतारि पुराग्रमिश्र हाकाररवेण पुरेण विसृष्टो हतावशे
षेणाश्वसैन्येन सहस्वपुरगमनमकरोत् ततो वनमार्गेण दुर्गेण गच्छन्नधिकबलेन शबलेन रभसादभिह
न्यमानो मूलबलाभिरक्षितावरोधः समहीपतिरोधः पलायिष्ट तदीयार्भकयोर्यमलयोर्धात्रीभावेन परिक्लि
ष्टाहं मद्दुहिता पितृव्रतागति भूपतिमनुगंतुमक्षमेऽभूव तत्र निशितवदनः कोऽपि रूपी कोप इव व्याघ्रो मामाघ्रातु

द०कु० मागतवान् भीताहमुदग्रग्रावशीमवलंबीपर्यपतं प्रदीप्तशिखश्चैव बालकः कस्यापि कपिलाशावस्य क्रोडम
८ भ्यपतत् तच्छवाकाङ्क्षिरोमर्षिरोमोऽग्रासपाशगण्डारोवारणमनयं चमुक्तोपाहरत् विलोलालकं बाल
कोऽपि शबरो दयाकुत्रचिन्नेतुं पानीयत्। कुमारमपरमुद्वहन्तीमहमुद्विग्ना कुत्र गता न जाने। साहं मोहं गता के
नापि कृपालुना वृद्धगोपालेन स्वकुटीरमावेश्य विरोपितव्रणाभवं ततः स्वस्थीभूय भूयः स्वामिभर्तुरन्तिकमुप
तिष्ठासुरसहायतया दुहितुरवगतिविज्ञानतया च व्याकुलीभवामीति मिदं धावितः एकाकिन्यपि समागतं गामिष्या
मीति मानदेव निरगात्। अहमपि भवन्मित्रस्य विदेहनाथस्य विपन्निमित्तं विषादमनुभवन्। तदन्वयांकुरं कुमार
मन्विष्यन् नन्देकं चण्डिकामंदिरं सुंदरं प्रागां। तत्र संततमेवंविधविजयसिद्धये कुमारं देवतोपहारकरिष्यंतः किराताः रा०म०
महीरुहशाखावलंबितमेनमस्मिन्नतयावा सैकततलेरवनन निशिमचरशां लक्ष्मीकृत्य शितशरानिकरेणावानेक ८

चरौः पलायमानं कुमारं बालकं कौर्वीदंशयित्वा संहनिष्याम इति भाषमाणाः मया सममभ्यभाषन्त तद्धि किरातेन
मा घोरप्रचारे कान्तारे स्खलितपथः स्थविरभ्रमस्तु रोहं स्वपुत्रकं कचिच्छायायां निक्षिप्य मार्गान्वेषणाय किंचि
दन्तरमगच्छं स कुत्र गतः केन वा गृहीतः परीक्ष्यापि न वा ज्ञायते तन्मुखालोकनसुखेन विना नेकान्यहान्यती
तानि किं करोमि क्व यामि भवद्भिर्न किमदर्शीति द्विजोत्तम कश्चिदत्र तिष्ठति किमेष तव नन्दनः सत्यमेतदेनं गृ
हाणेत्युक्त्वा दैवानुकूल्येन मह्यं तं व्यतरत् तेभ्यो दत्ताशीरहं बालकमङ्गीकृत्य शिशिरोदकादिनोपचारेणा
श्वास्य निःशङ्कं भवदङ्कं समानीतवानस्मि एनमायुष्मन्तं पितृरूपो भवानभिरक्षतादिति राजा तु हृदापन्नि
मित्तं शोकं तं नन्दनवदनविलोकनसुखेन किंचिद्धरीकृत्य तमुपहारवर्मनाम्नाहूय राजवाहनमिव पुपोष ज
नपतेरेकस्मिन्दिवसे तीर्थस्नानाय पक्कणनिकटमार्गेण गच्छन्नबलया कयापि चिट्टपलोलितमनुपमशरीरं कुमारं

दे॰भ॰ कंचिदवलोक्य कुतूहलाकुलस्तामपृच्छत् भामिनि तस्य चिरसूनोः सराजगुणसंपूर्णो रमावर्मको भवदन्वयसंभ
८ वो न भवति कस्य नयनानंदनो निमित्तेन केन भवदधीनो जातः कथ्यतां याथातथ्येन त्वयेति इत्युक्तया शबर्या मल्ली
९५ लमलापि राजन्नात्मपल्लीसमीपे पदव्यां वर्तमानस्य शक्रसमानस्य मिथिलेश्वरस्य सर्वस्वमपहरति शबरसै
न्ये मद्दयितेनापहृत्य कुमार एषः मह्यमर्पितो ऽस्य वर्द्धित तदवधार्य कार्यज्ञो राजा मुनिकथितं द्वितीयं राजकु
मारमेव निश्चित्य सामदानाभ्यां तामनुनीयापहारवर्मेत्याख्याय देव्यै वर्द्धयेति समर्पितवान् कदाचिद्वामदेवशि
ष्यः सोमशर्मा नाम कंचिदेकं बालकं राज्ञः पुरो निक्षिप्याभाषत देव रामतीर्थे स्नात्वा प्रत्यागच्छता मया कान
ननावनौ वनितया कयापि धार्यमाणमेनमुज्ज्वलाकारं कुमारं विलोक्य सादरमभाणि स्थविरे का त्वमेतस्मि राम॰
न्नटवीमध्ये बालकमुद्वहन्ती किमर्थमायासेन भ्रमसीति वृद्धयाप्यभाषि मुनिवर कालयवननाम्नि द्वीपे कालगु ८

ज्ञो नाम धनाढ्यो वैश्यवरः कश्चिदस्ति तन्नंदिनी नयनानंदकारिणी सुज्ञज्ञाना मेतस्माद्द्वीपादागतो मगधक्षनाथ
मंत्रिसंभवो रत्नोद्भवो नाम रमणीयगुणालयो भ्रांतभूवलयो मनोहारी व्यवहारी उपयम्य सुवस्तुसंपदा श्वशु
रेण संमानितोऽभूत् कालक्रमेण नतांगी गर्भिणी जाता ततः सोदरविलोकनकुतूहलेन रत्नोद्भवः कथंचि
त् श्वशुरमनुनीय चपललोचनया सह प्रवहणमारुह्य पुष्पपुरमभिप्रतस्थे कल्लोलमालिकाभिहतः पोतः
समुद्रांभस्यमज्जत् गर्भभरालसां ललनां धात्रीभावेन कल्पिताहं कराभ्यां सुदृढं तां फलकमेकमधिरुह्य दै
वगत्या तीरभूमिमगमं सु[illegible]त्सज्जनपरिवृतो रत्नोद्भवस्तत्रैव निमग्नो वा केनोपायेन तीरमहान जानामि
क्लेशस्य परां काष्ठामधिगता सुहृन्नास्मिन्नटवीमध्ये घस्रानमस्रत् प्रसववेदनया विचेतना साबच्छायशीतले
तरुतले निवसति विजने वनेऽस्यास्तु मशक्यतया जनपदगामिनं मार्गमन्वेष्टुमुद्युक्तया मया विवशायास्तस्याः

द०पू० समीपे बालकं निक्षिप्य गन्तुमनुचितमिति कुमारोऽप्यनायीति एतस्मिन्नेव क्षणे वनोवारणकः कश्चिद्दर्शपतनं वि
२ लोक्य भीता सा तं निपात्य प्राद्रवत् अहमपि समीपलतागुल्मं प्रविश्य परीक्षमाणोऽतिष्ठं निपतितं बालकं पल्ल
वकवलमिवाददति गजपतौ कण्ठीरवो भीमरवो महाग्रहेणाभ्यपतत् भयाकुलेन दंतावलेन झटिति वियति याप्य
मानो बालकोऽप्यपतत् चिरायुष्यतया मज्झोन्नततरुशाखासमासीनेन वानरेण केनचित्पक्वफलमनीषया प
रिगृह्य फलेतरतया विततस्कंधमूले निक्षिप्तोऽभूत् सोऽपि मर्कटः क्वचिदगात् बालेन सत्वसंपन्नतया सकल
क्लेशसहेनाभावि केसरिणा करिणं निहत्य क्वचिदगामि लतागृहान्निर्गतोऽहमपि तेजःपुंजं बालं शैलेरव
तीक्ष्णादवतार्य वनान्तरे वनितामन्विष्याविलोकितमानीय गुरवे निवेद्य तन्निदेशेन भवन्निकटमानीतवानस्मीति राम०
सर्वेषां सुहृदामेकदैवानुकूलदैवभावेन महदाश्चर्यं बिभ्राणो राजा रत्नोद्भवः कथमभवदिति चिंतयत् तन्नंदनं ४

पुष्पोद्भवनामधेयं विधाय तदुदन्तं व्याख्याय तस्मै सुश्रुताय विषादसंतोषावनुभवन् तदनुजेन तनयं समर्पितवान् । अन्ये
द्युः कंचन बालकमुरसि दधती वसुमती वल्लभमभिगता । तेन कुत्रत्योऽयमिति पृष्टा समभाषत । राजन्नतीतायां रा
त्रौ काचन दिव्यवनिता मत्पुरतः कुमारमेकं संस्थाप्य निद्रामुद्रितां मां विबोध्य विनीताब्रवीत् । देवि त्वन्मन्त्रिणो
धर्मपालनन्दनस्य कामपालस्य वल्लभा यक्षकन्याहं तारावली नाम नन्दिनी माणिभद्रस्य यक्षेश्वरानुमत्या तदा
त्मजेन भवन्नन्दनस्याम्भोनिधिवलयवेष्टितक्षोणीमण्डलेश्वरस्य भाविनो विशुद्धयशोनिधे राजवाहनस्य परिच
र्याकरणायानीतवत्यस्मि । त्वमेनं मनोजसंनिभमभिवर्धयेति । विस्मयविकसितनयनया मया सविनयं सत्कृ
ता स्त यक्षी पक्षी साप्यदृश्यतामयासीदिति । कामपालस्य यक्षकन्यासंगमे विस्मयमानमानसो राजहंसो रञ्जि
तमित्रं सुमित्रमाहूय तदीयभ्रातृपुत्रमर्थपालं विधाय तस्मै सर्ववार्त्तादिकं व्याख्याय प्रादात् । ततः परस्मिन्दिवसे वामदे

द० पू० वांतेवासी तदाश्रमवासी समाराधितदेवकीर्त्तिः कुमारमेकमवगमय्य नरपतिमवादीत् देवतीर्थयात्राप्रसंगेन
१० कावेरीतीरमागतोऽहं । विलोलालकं बालकं निजोत्संगगतं विधाय रुदंतीं स्थविरामेकां विलोक्यावोचं स्थवि
10 रे कात्वमयमर्भकः कस्य नयनानंदकरः कांतारं किमर्थमागता शोककारणं किमिति सा कररुहेण बाष्पजल
मुत्सृज्य निजशोकशंकूत्पाटनक्षममिव मामवलोक्य शोकहेतुमवोचत् द्विजात्मज राजहंसमंत्रिणः सित
वर्मणः कनीयानात्मजः सत्यवर्मा तीर्थयात्राभिलाषेणादेशमेनमागच्छत् स कांचिदग्रहारे कालीनामेकस्य भू
सुरस्य नंदिनीं विवाह्य तस्यामनपत्यतया गौरीनामतद्भगिनीं कांचनकांतिं परिणीय तस्यामेकं तनय
मलभत काली सासूयमेकदा धात्र्या मया सह बालमेनमेकेन मिषेणानीय तटिन्यामेतस्यामक्षिपत् करेणै राम० 
केन बालमुद्धृत्यापरेण प्लवमाना नदीवेगागतस्य कस्यचित्तरोः शाखामवलंब्यमत्राशिशुं निधाय नदीवेगेनोह्यमा १०

नाकेनचिन्नफलग्रहेनकालभोगिनाहमदंशि मद्बलं वीक्ष्य तोऽस्फुटोऽयमस्मिन्देशे नीरसञ्जमत गरलस्योद्दीपनत
यामथिमस्तायामरगोपकस्यन शरणो नास्तीति मयाशोच्यत इति ततो विषमविषज्वालावलीढावयवासा
धरणितले न्यपतत् तदा विशिष्टमंत्रबलेन विषव्यवस्थामपनेतुमक्षमः समीपकुंजे स्वौषधविशेषमन्विष्य
प्रत्यागतो मुक्तां तज्जीवितां व्यलोकयं तदनु तस्याः शवसंस्कारं विरचय्य शोकाकुलं बालमेनमगतिमादाय
सत्यवर्मवृत्तान्तश्रवणवेलायां तत्रिगर्तस्याग्रहारनामधेयस्यास्तु तत्र यातं दैवेषु ग्रामं शक्यमित्यालोच्य भवदमा
त्यतनयस्य भवानेवाभिरक्षितेति भवंतमेनमनयमिति तन्निशम्य सत्यवर्मस्थितेः सम्यगनिश्चिततया खिन्नमा
नसो नरपतिः सुमतये मंत्रिणे सोमदत्तं नाम तदनुजतनयमर्पितवान् सोऽपि सोदरमागतमिव मन्यमानो विशेषेण
पुपोष एवं मिलितेन कुमारमंडलेन बालकेलीरनुभवन्नधिरूढानेकवाहनो राजवाहनोऽनुक्रमेण चोपनयनादि

द०पू० संस्कारजातमलभत ततः सकललिपिज्ञानं निखिलदेशीयभाषापांडित्यं षडंगसहितवेदसमुदायकोविदत्वं
११ काव्यनाटकाख्यानकाख्यायिकेतिहासचित्रकथासहितपुराणगणनैपुण्यं धर्मशब्दज्योतिस्तर्कमीमांसा
दिसमस्तशास्त्रचातुर्यं कौटिल्यकामंदकीयादिनीतिपटलकौशलं वीणाद्यशेषवाद्यदाक्ष्यं संगीतसाहित्य
हारित्वं मणिमंत्रौषधादिमायाप्रपंचचातुर्यं मातंगतुरंगादिवाहनारोहणपाटवं विविधायुधप्रयोगचणत्वं चौ
र्यदुरोदरादिकपटकलाप्रौढत्वं च तत्तदाचार्येभ्यः सम्यग्लब्ध्वा यौवनेन विलसंतं कृत्येष्वनलसंतं कुमारनिकरं नि
रीक्ष्य महीवल्लभः सोऽहं शत्रुजनदुर्लभ इति परमानंदमविंदत ॥ ॥इति श्रीदंडिनः कृतौ दशकुमारचरिते
छु १ कुमारोत्पत्तिर्नाम प्रथम उच्छ्वासः ॥ ॥अथैकदा वामदेवः सकलकलाकुशलेन कुसुमसायकसंशयितसौंदर्येण राम०
कल्पितसोदर्येण सहसोपहसितकुमारेण सुकुमारेण जयध्वजातपवारणकलशांकितकरेण कुमारनिक ११

रेणपरिवेष्टितं राजानमानतशिरसं समभिगम्य तेन कृतां परिचर्यामंगीकृत्य निजचरणकमलयुगलमिलन्म
धुकरायमाणकाकपक्षं विदलितविपक्षं कुमारं च गाढमालिंग्य मितसत्यवाक्येन विहिताशीरभ्य
भाषत भूवल्लभ भवदीयमनोरथफलमिव समृद्धलावण्यं तारुण्यं नूतनमिदानीं भवत्तनयोऽनुभवति सहचरसमे
तस्य नूतमेतस्य दिग्विजयारंभसमय एषः तदस्य सकलक्लेशसहस्य राजवाहनस्य दिग्विजयः प्रमाणं क्रिय
तामिति कुमारा मारा अभिरामा रामा — पौरुषा रुषा भस्मीकृतारयो रयोपहसितसमीरणा रणाभियानेन या
नेनाभ्युदयाशंसं राजानमकार्षुः तत्साचिव्यमितरेषां विधाय समुचितां बुद्धिमुपदिश्य शुभे मुहूर्ते सपरि
वारं कुमारं विजयाय विससर्ज राजवाहनो मंगलसूचकं शुभशकुनं विलोकयन्देशं कंचिदतिक्रम्य विंध्याटवीम
ध्यमुपविशत तत्र हेतिहतिकिणांककालायसकर्कशकायं यज्ञोपवीतेनानुमेयविप्रभावं व्यक्तकिरातप्रभावं

लोचनपरुषं कमपि पुरुषं ददर्श तेन विहितपूजनो राजवाहनोऽभाषत ननु मानव जनसंगरहिते मृगसहिते घो
रेऽस्मिन्कान्तारे विन्ध्याटवीमध्ये भवानेकाकी किमिति निवसति भवदंसोपनीतं यज्ञोपवीतं भूसुरभावं द्योतय
ति हेतिहतिभिः किरातरीतिरनुमीयते कथय किमेतदिति तेजोमयोऽयं मानुषमात्रपौरुषो नूनं न भवतीति म
त्वा पुरुषस्तद्वयस्यमुखान्नामजन्मनी विज्ञाय तस्मै निजवृत्तान्तमकथयत राजनन्दन केचिदस्यामटव्यां वेदादि
विद्याभ्यासमपहाय निजकुलाचारं दूरीकृत्य सत्यशौचादिधर्मव्रातं परिहृत्य किल्बिषमन्विष्यन्तः पुलिन्दपुरो
गमास्तदन्नमुपभुंजाना बहवो ब्राह्मणब्रुवाः निवसन्ति तेषु कस्यचित्तनुजो निन्दापात्रचारित्रो मातंगो नामाहं
सह किरातबलेन जनपदं प्रविश्य ग्रामेषु धनिनः स्त्रीबालसहितानानीय बन्धने निधाय तेषां सकलधनमपह
रन्नुद्धृत्य वीतदयोऽव्यचरं कदाचिदेकस्मिन्कान्तारे मदीयसहचरगणेन जिघांस्यमानं भूसुरमेकमवलोक्य दया

पन्नचित्तोऽस्तु त्वं ननु पापानहं तच्चो न हंतव्यो ब्राह्मणा इति तेनोक्ष्याक्रागनयनाभो वज्रधारिमस्तंयन् तेषां भाष
णापारुष्यमसहिष्णुरहमवनीसुरस्क्रूराणां चिरं प्रभुद्यतैरभिहतो गतजीवितोऽभवं ततः प्रेतपुरीमुपेत्य तत्र
दिव्यदेहधारिभिः पुरुषैः परिवेष्टितं सभामध्ये रत्नखचितसिंहासनासीनं शमनं विलोक्य तस्मै दंडप्रणाममकर
वं सोऽपि मामवेक्ष्य चित्रगुप्तं नाम निजममात्यमाहूय तमवोचत् सचिव नैषोऽस्य मृत्युसमयः निंदितचरि
तोऽप्ययं महीसुरान्निमित्तं गतजीवितोऽभूत् इतः प्रभृति विगतकल्मषस्यास्य पु● ण्यकर्मकरणे रुचिरुदेष्य
ति पापिष्ठैरनुभूयमानमनुयातनाविशेषं विलोक्य पुनरपि पूर्वशरीरमनेन गम्यतामिति चित्रगुप्तोऽपि तत्रतत्र
संतप्तेष्वायसस्तंभेषु बध्यमानान्भ्रमन्तु स्त्रीकृते वितनसगावतैले क्षिप्यमाणान्लगुडैर्जर्जरीकृतावयवान्निशि
तटंकैः परितक्ष्यमाणान्निदर्शयित्वा पापकृद्भिरुपदिश्यमानमभुंक्त ततो देव पूर्वशरीरमहं प्राप्तो महाटवीमध्ये शान्त

द॰कु॰ लोपचारं रचयन्ता महीसुरेण परीक्ष्यमाणः शिलायां शायितः क्षणमतिष्ठं तदनु विदितोदन्तो मदीयबन्धुगणः स
१३ हसा समागत्य मन्दिरमानीय मामपक्रान्तव्रणमकरोत्। द्विजन्मा कृतज्ञो महात्मा मत्कृतशुश्रूषां विधाय विविधागम
तन्त्रमाख्याय कल्मषक्षयकारणं सदाचारमुपदिश्य ज्ञानेक्षणा गम्यमानस्य शशिखण्डशेखरस्य पूजाविधान
13 मभिधाय पूजां मत्कृतामङ्गीकृत्य निरगात्। तदारभ्याहं किरातसंसर्गं बन्धुकुलमुत्सृज्य सकललोकैकगुरु
मिन्दुकलावतंसं चेतसि स्मरन्नस्मिन्कानने दूरीकृतकलङ्को वसामि। देव भवते विज्ञापनीयं रहस्यं किंचिदस्मा ग
म्यतामिति। सवयस्यगणादपनीय रहसि पुनरेनमभाषत। राजन्नतीते निशान्ते गौरीपतिः स्वप्नसंनिहितो निद्रा
मुद्रितलोचनं विबोध्य प्रसन्नवदनकान्तिः प्रश्रयावनतं मामभाषत। मातङ्ग दण्डकारण्यान्तरालगामिन्यास्तटिन्यास्ती राम॰
रभूमौ सिद्धसाध्याराध्यमानस्य स्फटिकलिङ्गस्य पश्चादद्रिपतिकन्यापदपङ्क्तिचिह्नितस्याश्मनः सविधे विधेरान १३

नमिव किमपि विलंबं विद्यते तत्र निश्चितं ताम्रशासनं विधातुरिव शासनं समादाय विधिं तदुपदेष्टुं दिष्टविजयमिव
विधाय पाताललोकाधीश्वरेण भवता भवितव्यं भवत्साहाय्यकरो राजकुमारो द्यश्वो वा समागमिष्यतीति त
दादेशानुगुणमेवमवदागमनमभ्युत् साधनाभिलाषिणो मम तोषिणो रवयमसहाय्यमिति तथेति राजवा
हनः साकं मातंगेन समं तान मितो न्नमांगेन विज्ञायार्द्धरात्रे निशापरतंत्रं मित्रगणं वनांतरमवाय तदनु तदष्टवर्गः
कल्ये साकल्येन राजकुमारमनवलोकयंतो विषण्णहृदयास्तेषु वनेषु सम्यगन्विष्यानवेक्षमाणा गारादन्वेषण
मनीषया देशांतरं चारिष्णवोऽतिसहिष्णवो निश्चित बुतः संगमसंकेतस्थानाः परस्परं विसृज्य ययुः लोकैकवी
रेण कुमारेण कुमाराः संत्वष्टांतरं ग्रामान्तगोपि विल्वंशा शिशेखरकाथिताभिज्ञानपरिज्ञातं निःशंकं प्रविश्य ग्र
हीत ताम्रशासनो रसातलं ययातेनैवोपेत्य नन्नकस्य चित्सन्नतस्य निकटकेलिकाननकासारस्य विगतमारतस्य

द॰पू॰ समीपे तातेनाविधेन शासनविधानोपपादितेन हविषा होमे विरच्यमाने हुतवहपरिहारि रश्मिविस्मयं विलोकयति राजवा
१५ हने समिद्धाज्यसमुज्ज्वलिते ज्वलने पुराणगोहं निजदेहं मंत्रपूर्वकमाहुतीकृत्य तडित्समानकांतिं दिव्यां तनुमल
15 भत तदनु मणिमयमंडनमंडलमंडितासकललोकललनाकुलललामभूता कन्यका कांचनविनीतानेकस
खीजनानुगम्यमाना कलहंसगत्या शनैः शनैरागत्य वह्निस्तुरोत्तमाय मणिमेकमुज्ज्वलाकारमुपायनीकृत्य तेन का
न्तामिति प्रणामोत्कंठाकलकंठस्वनेन मंदमंदमुद्दंजलिरभाषत: भूसुरोत्तमाहमस्तुरोत्तममन्ये दितीकालिंदीना
मममपितास्य लोकस्य शासिता महानुभावो निजपराक्रमामद्विष्णुनाविष्णुना हूरीकृतामरेसमरे यमनगराति
थिरकारि तद्वियोगशोकसागरमग्ना मामवेक्ष्य कोपिकारुणिकः सिद्धतापसो भाषत वालकस्त्विहि वादेहधा राम॰
री मानवो नवो वत्सभस्त्र व भूत्वा सकलं रसातलं पालयिष्यतीति तदादेशं निशम्य घनशोकोन्मुखी चातकी वर्षा १५

गमनमिव नवालोकनाकांक्षिणी चिरमतिष्ठं मन्मनोरथफलायमानं भवदागमनमवगम्य मद्राज्यावलंबनभूतामात्या
नुमत्या मदत्तानुज्ञेन मारथेन मनसा प्रवर्त्तमागच्छ लोकस्यास्य राजलक्ष्मीमंगीकृत्य मां तत्सपत्नीं करोतु भवानिति
मातंगोपि राजवाहनानुमत्या तां तन्नगरीं परिणीय दिव्यांगनालाभेन हृष्टतरो रसातलराज्यमुरीकृत्य परमानंदमा
ससाद देवचिंतितावयस्यगणास्समागता राजवाहनः तद्वलोकनकौतूहलेन भुवंगामिष्णुः कालिंदीदत्तं परिभव
क्षुत्पिपासादिक्लेशनाशनं मणिं साहाय्यकरणोत्सुकात्मा तं गालवं कंचन ब्राह्मणमनुव्रजमानं तं विसृज्य विलपथे
ननेन निर्ययौ तत्र च मित्रगणागमनावलोकपुर्व्वं धाम भ्रमन्सु विशालोपशल्ये कमप्याक्रीडमासाद्य तत्र विश्रमिषुरां
दोलिकारूढं रमणीसहितमागजनपरिहृतमुपागतमेकं पुरुषमपश्यत् सोपि परमानंदेन पल्लवितचेता विक
सितनवदनारविंदो मम स्वामी सोमकुलावतंसो विशुद्धयशोनिधी राजवाहन एष महाभागपतया ऽकांडदृष्टो वास्य पादद्वंलग्न

द·पू· तवानस्मिसंप्रतिमहानुपनेतामेजातइतिससंभ्रममंदोलिकायाअवतीर्यसरभसपदविन्यासविलासहर्षोत्कर्ष
१५ चरितःत्रिचतुःपदान्युद्गतस्तस्यचरणकमलयुगलंगलदुल्लसन्मल्लिकावलयेनमौलिनापस्पर्श प्रमोदाश्रुपू
15 र्णगंगजापुलकितांगंतंगाढमालिंग्यायेसौम्यसौमदत्तइतिव्याजहार ततःकस्यापिपुन्नागभूरुहस्यछायाशीत
लेतलेसंविष्टेनमनुजनाथेनसप्रणयमभाणिसखेकालमेतावंतंदेशेकस्मिन्प्रकारेणकेनार्थापिभवतासंप्रतिकु
त्रगम्यते तरुणीकेयमेषपरिजनःसंपादितःकथंकथयेति सोपिमित्रसंदर्शनव्यतिकरापगतचिंताज्वरातिश
योमुकुलितकरकमलःसविनयमात्मीयप्रचारप्रकारमवोचत॥ ॥इतिदंडिनःकृतौदशकुमारचरितेद्विजो
पकृतिर्नामद्वितीयउच्छ्वासः॥ ॥देवभवच्चरणकमलसेवाभिलाषीभूतोहंभ्रमन्नेकस्यांवनावनौपिपासाकुलो राम·
लतापरिवृतेशीतलंनदस्सलिलंपिबन्नुज्ज्वलाकारंरत्नंतत्रैकमद्राक्षं।तदादायगत्वाकंचनाध्वानमंबरमणेरत्युष्मत १५

यागं त्वमकृमो वनेस्मिन्नेव किमपि देवतायतनं प्रविशो दीनाननं वक्तुं तनयसमेतं स्थविरं महीसुरमेकमवलोक्य कृश
लमुदितदयोहमपृच्छं कार्पण्यपविवर्णवदनो महाशाशशर्मा मानसो नावदग्रजन्मा । महाभागस्तुतानेतान्मा
तहीनाननेकेस्मपायेरक्ष्विदानीमस्मिन्नकुदेशो वक्तुं मैकं संपाद्यददतोध्यो वस्माभिशिवालये स्मिन्निति भूदेव प
तत्कटकाधिपती राजा कस्य देशस्य किन्नामधेयः किमन्नागमनकारणमस्येति एष्टोऽभाषत महीसुरः सौम्य
मत्तकालो नाम लाटेश्वरो देशस्यास्य पालयितुर्वीरकेतोस्तनयां वामलोचनां नाम तरुणीरत्नमसमानलाव
ण्यां श्रावं श्रावमवधूतदुहितृप्रार्थनस्य तस्य नगरीमरोत्सीत् वीरकेतुरपि भीतो महदुपायनमिव तनयां मत्तका
लायादात् तरुणीलाभहृष्टचेतो लाटपतिः परिणेया निजपुरमेव नेति निश्चित्य गच्छन्निजदेशं प्रति संप्रति मृगयादरेणा
त्र वने सैन्यावासमकारयत् कन्यासारेण नियुक्तो मानपालो नाम वीरकेतुमंत्री मानधनश्चतुरंगबलसमन्वितोन्य

द.पू.
१६
16

त्र र चितन[illegible]शि विरक्तं निजनाथावमानखिन्नमानसोंतर्हिंमेदेति विशेषमोवकृतनयोविहाराय निर्गतः स्थविर स्व
दानयोग्यइतितस्मैकरुणापूर्णमनारत्नमदां परमाह्लादविकसिताननेनाभिहितानेकाशीः कुत्रचिदग्रजन्मा
जगाम अध्वश्रमखिन्नेनमयातत्रनिरवेशिनिद्रासुखं तदनुपश्चान्निगडितबाहुयुगलःसभ्रस्तरःकशा
घातचिह्नितगात्रोऽनेकैर्नैस्त्रिंशिकानुयातोऽभ्युपेत्यमामसौदस्युरित्यदर्शयत परित्यक्तान्नस्तराराजभटास्ता
वाक्षिप्रकारंमदुक्तमनाकर्ण्यभयरहितंमांगाढंनियम्यरज्जुभिरानीयकारागारमेनेतवसखायइतिनिग
डितान्कांश्चिन्निर्दिश्यैवंतोमामपिनिगडितचरणयुगमकार्षुः किंकर्तव्यतामूढेननिराशङ्केशगानुभवेना
वोचिमया नेतुपुरुषावीर्यपरुषानिमित्तेनकेनतान्विशाय्यकारावासदुःखंदुस्तरंप्रयंवयस्याइतिनिर्दिष्टमे रामः
तेः किमिदमिति तथाविधंमामवेक्ष्यब्राह्मणस्ताडितमयास्तुतंललाटपातितान्नातमाख्यायचौरवीराःपुनरवोचन् म १६

ह्वा भागवीरके त्वमं ते श्रीमानपालस्य किंकरा वयं तदाज्ञया लाटेश्वरमाररागापराज्ञोऽस्त्वरंगाहारे रामतदागारं प्रवि
ष्टपतत्रगज्ञभावेन विषगाधनमपहृत्य मस्हारवोञ्झा विशाम अपरे द्युस्रुपदाते विशो राजा तु चरा व हवोऽभ्यन्त
धृतधनचयान्नस्मान्पारितः परिवृत्य हठतरं वध्याकटकमानीय समस्तवस्त्रशोधनवेलायामेकस्यान घ्रार
त्नस्याभावेनास्मद्वधायमाणिक्यादानायास्मान्किला शृंखलयन्निति श्रुत्वा तरत्नरत्नालोकनस्यातो हमिदं तदे
व माणिक्यमिति निश्चित्य भद्रदेवदानामिमिन्नां दुरवस्थामात्मनो जन्मनामधेयं युष्मद्द्वेषरागपर्यंतं प्रकारं चा
भाष्य समये चित्तैः संलापैर्मैत्रीमकार्षं ततो हं राज्ञेतेषां मम च शृंखलाबंधनं निर्भिद्य तैरनुगम्यमानो निर्गत्य स्वगृहा
स्य गणास्मानुधजात मादाय पुरराज्ञा स्मरतो मित्रवर्गगतान्नृपपदुपराक्रमलीलया मित्रमानपालाशिविरं प्रा
विशं मानपालो विज्ञः किंकरेभ्यो मम कुलाभिमानवृत्तांतं तत्कालीनं विक्रमं च निशम्य मामर्चयत् परेद्युर्मत्का

दृ·प्र० लेनप्रेषिताःकेचनपुरुषाःमानपालमुपेत्यमंत्रीत्वदीयराजमंदिरेतुरंगयावज्रधनमपहृत्यचोरवीरावमदीपक
१७ टकंप्राविशत् तानपश्यतोचेन्महाननर्थःसंभविष्यतीतिक्रूरतरंवाक्यमब्रुवन् तदाकर्ण्यरोषारुणितनेत्रोला
टपातिःकस्तेनमैत्रीकापुरुषस्यवराकस्यमेवपाकिंलभ्यमितितान्निरभर्त्सयत् तेमानपालेनोक्तंविप्रलापंम
17 न्नकालायततथैवाकथयन् कुपितोपिललाटपतितैर्दीर्घांगर्वेरागाल्पसैनिकसमेतोयोद्धुमभ्यगात् पूर्वमेवक
तमरगानिसृत्योमानीमानपालःसन्नद्धयोधोद्धुरुक्तामेधनत्वानिशंकंनिरगात् अहमपिमवज्रमानंमंविद्
न्नातिवज्रलतुरंगमोपेतचतुरस्रारथिरथंचहट्टतरंकवचंमदनुरूपंचापंचविविधवाणाघ्नंगितत्राणिरहयंमत्रुवि
तान्याप्युधानिगृहीत्वायुद्धसन्नद्धोमदीयबलविश्वासेनरिपुहरणोद्युक्तंमंत्रिणामन्वगां परस्परमत्सरेणात्तमुल राम०
संगरःकरप्रभयसैन्यमतिक्रम्यममसुत्वसद्गुज्जातोपेतवाणावर्षनदंगोमुंचन्नरातीशाहरंततो निरयंतुरंगंममद्य ७

तन्निकरं नीत्वा शीघ्रलंघनोपेतनदीपरयोऽहमराते: शिरकर्तनमकार्षं । तस्मिन्निपतिते तद्वशीयसैनिकेषु प
लायितेषु नानाविधहयगजादिवस्तुजातमादाय परमानंदसन्नतो मंत्रीममानेकविधां संभावनामकार्षीत्
।मानपालप्रेषितात्तदनुचरादेवमखिलमुदंतमाकर्ण्य संतुष्टमना राजाग्रभुजङ्गतो मदीयपराक्रमे विस्म
यमान: सम्मोहात्त्वममात्यबांधवान्तुमत्या सुभदिने निजतनयां मह्यमदात् । ततो यौवराज्याभिषिक्तोऽहमनु
दिनमाराधितमहीपालचित्तो वामलोचनया तनयासह नानाविधं सौख्यमनुभवन्नभवद्विरहवेदनाशल्यस्खल
भवैकल्यहृदय: सिद्धादेशेन स्वस्त्रज्ञानावलोकनफलप्रदेशं महाकालनिवासिन: परमेश्वरस्याराधनायाहं
पत्नीसमेत: समागतोऽस्मि भक्तवत्सलस्य गौरीपते: कारुण्येन भवत्पादारविंदसंदर्शनानंदसंगोऽहो मयालब्ध इति
तन्निशम्य ऋभिनंदितपराक्रमो राजवाहनस्तं निरपराधं दंडे देवमुपालभ्य तस्मै क्रमेणात्मचरितं कथयामास

द·पू· तस्मिन्नवसरेऽन्तरतः पुष्पोद्भवं विलोक्य ससंभ्रमं निजनिटिलतटस्पृष्टनिजचरणांगुलिमुदंजलिममुं गाढमालिं
१८ ग्यानंदबाष्पसंकुलसंफुल्ललोचनः सौम्य सोमदत्त अयं स पुष्पोद्भव इति तस्मै तं दर्शयामास तौ च चिरविरह
18 दुःखं विसृज्यान्योन्यालिंगनसुखमन्वभूतां ततस्तस्यैव महीरुहस्य छायायामुपविश्य राजा समभाषत वय
स्य भूसुरकार्यं करिष्णुरहं मित्रगणो विदितार्थः सर्वथांतरायं करीष्यतीति निद्रितान् भवतः परित्यज्य निरगां
॥ तदनु प्रबुद्धो वयस्यवर्गः किमिति निश्चित्य मदन्वेषणाय कुत्र गतवान् भवानेकाकी क्व गतेति सोऽपि ललाट
तटचुंबदंजलिपुटः सविनयं समालपत् ॥ ॥ इति दंडिनः कृतौ दशकुमारचरिते सोमदत्तचरितं नाम तृती
य उच्छ्वासः ॥ ॥ देव महीसुरोपकारायैव देवो गतवानिति निश्चित्यापि देवेन गंतव्यं देशं निर्णेतुमशक्नुवानो राम·
मित्रगणाः परस्परं वियुज्य दिक्षु देवमन्वेष्टुमगच्छत अहमपि देवस्यान्वेषणाय महीमटन् कदाचिदंतरमध्यगत १८

स्यांचरमरोः किरणामसमाहितस्मुरेकस्य गिरितटमहीरुहस्य प्रच्छायशीतलेतले क्षणमुपाविशं ममपुरोभागेमध्या
दिनसमयसंकुचितसर्वावयवांकूर्माकृतिंमानुषच्छायांनिरीक्ष्योन्मुखोगगनतलान्महारयेणापतंतंपुरु
षंकंचिदंतरालएवदयोपनतहृदयोहमवलंब्यशनैरवनितलेनिक्षिप्यदूरपातवीतसंज्ञंतंशिशिरोपचारै
राविर्बोध्यशोकातिरेकरोगोद्गतवाष्पलोचनेनतंभृगुपतनकारणमपृच्छं सोपिकरतलहैरश्रुकणगलनयनय
न्नभाषत सौम्यमगाधनाथामात्यस्यपयोद्भवस्यात्मसंभवोरत्नोद्भवोनामाहं वाणिज्यरूपेणकालयव
नद्वीपमुपेत्यकामपिवणिक्कन्यकांपरिणीयतयासहप्रत्यागच्छन्नंबुधौतीरस्यानतिदूरएवप्रवहणस्यभग्न
तयासर्वेषुनिमग्नेषुकथंकथमपिदैवानुकूल्येनतीरभूमिमभिगम्यनिजांगनावियोगदुःखार्णवेप्लवमानः
कस्यापिसिद्धतापसस्यादेशाद्रेणाषोडशाब्दायनानिकथंचिद्विनीयदुरवस्थापारमवेक्ष्यमाणोगिरिपतनमका

द॰पू॰ र्षमिति एतस्मिन्नेवावसरे किमपि नारीकूजितमश्रावि तावत्तमसुचितमिदं यस्मिन्नहा दिव्येऽपाति तनयामिलने
१९ विरहमसहिष्णुर्वैश्वानरं विशामीति तन्निशम्य पतो विदितजनकभावं तमवादिषं तात भवते विज्ञापनीयानि
19 बहूनि सन्ति भवत्पश्चादखिलमाख्यातव्यं अधुना नारीकूजितमनुपेक्षणीयं मया॰ क्षणमात्रमत्र भवतास्थी
यतामिति तदनु सोऽहं त्वरया किंचिदन्तरमगमं तत्र पुरतो भयंकरज्वालाकुलहुतभुगवगाहनसाहसिकां मुकुलि
तांजलिपुटां वनितां कांचिदवलोक्य ससंभ्रममनलादपनीय कूजन्त्या सह पितुरभ्यर्णमभिगमय्य स्थवि
रमवोचं हंहो भवन्तौ कुत्रत्यौ कान्तारे निमित्तेन केन दुःखावस्थानुभूयते कथ्यतामिति स गद्गदमवादीत पुत्रका
लयवनद्वीपे कालगुप्तनाम्नो वणिजः कस्यचिद्दुहिता सुवृत्ता नाम रत्नोद्भवेन निजकान्तेनागच्छन्ती जलधौ मग्ने राम॰
प्रवहणे निजधात्र्या मया सह फलकमेकमवलम्ब्य दैवयोगेन कूलमुपेतासन्नप्रसवसमया कस्यांचिदटव्यामात्म १९

जन्मप्रभृत ममत्तु मंदभाग्यतया बालेवनमातंगेन गृहीतेऽस्मिन् द्वितीयापरिभ्रमन्ती षोडशवर्षानन्तरं भर्तृपुत्रसंगमो भविष्य
तीति सिद्धवाक्यविश्वासादेकस्मिन्नुटजाश्रमे तावन्तं समयं नीत्वा शोकमपारं सोढुमक्षमा समुज्ज्वलिते वैश्वानरे
शरीरमाहुतीकर्तुमुद्युक्तासीदिति तदाकर्ण्य निजजननीं ज्ञात्वा तां महदुद्दंडवत्प्रणामपतितस्सोऽयमिदंतमखिलमाख्या
यद्धात्रीभाषणात्फुल्लवदनं विस्मयविकसिताक्षं जनकमदर्शयं पितरौ तौ साभिज्ञानमस्तोकं ज्ञात्वा मुदितान्तरा
त्मानौ विनीतं समासानन्दाश्रुवर्षेणाभिषिच्य गाढमाश्लिष्य शिरस्युपाघ्राय कस्याञ्चिन्महीरुहच्छायायामुपाविशतां
। कथं निवसति महीवल्लभो राजहंस इति जनकेन पृष्टो हंसस्य राज्यच्युतिं त्वदीयजननं सकलकुमारागवाप्तिं तव दिग्विज
यारंभं भवतो मातङ्गानुयानमस्माकं युष्मदन्वेषणकारणं सकलमभ्यधां ततस्तोकसा चिदाश्रमे मुनेरस्थापयं ततो
देवस्यान्वेषणपरायणोऽहमखिलकार्यनिमित्तं विन्नं निश्चित्य भवदनुग्रहाल्लब्धस्य साधकत्वस्य साहाय्यकरणादक्षं शिष्य

द.चू. णांनिष्पाद्यविंध्यवनमध्येपुरातनपत्तनस्थानमुपेत्यविविधनिधिसूचकानांमहीरुहाणामधोनिक्षिप्तान्
१० वसुपूर्णान्कलशान्सिद्धांजनेनज्ञात्वारक्षिषुपरितःस्थितेषुखननसाधनेनकृत्वादीनारानसंख्यान्राशीकृ
त्यतत्कालागतमनतिदूरेनिवेशितंवणिक्कटकंकंचिदभ्युपेत्यतत्रबलिनोबलीवर्दान्गोणीश्चक्रीत्वान्यद्द्रव्य
20 मिषेणवसुतद्गोणीसंचितंतैरुह्यमानंशनैःकटकमनयंतदधिकारिणाचंद्रपालेनकेनचिद्वणिक्पुत्रेणविरचि
तसौहृदोऽहममुनैवसाकमुज्जयिनीमुपाविशंमत्पितरावपितांपुरीमभिगमय्यसकलगुणनिलयेनबंधुपाल
नाम्नाचंद्रपालजनकेननीयमानोमालवनाथदर्शनंविधायतदनुमत्यागूढवसतिमकरवं ततःकाननभूमिषु
भवंतमन्वेष्टुमुद्युक्तंमांपरममित्रंबंधुपालोनिशम्यावदत् सकलधरणीतलमपारमन्वेष्टुमक्रमोभवान्मनोग्ला राम०
निंविहायतूष्णींतिष्ठतु भवन्नायकालोकनकारणंशुभशकुनंनिरीक्ष्यकथयिष्यामीतितद्वचनामृतास्वादि १०

१.

तन्हृदयोहमनुदिनं तदुपकंठवर्त्ती कदाचिदिंदुसुंदरीं नवयौवनावलीढावयवां नयनचंद्रिकां बालचंद्रिकां नाम तरु
णीरत्नं वणिक्कुमंदिरलक्ष्मीमूर्त्तिमवलोक्य तदीयलावण्यावष्टब्धधीरभावो ललनानवागुरावागुरालक्ष्यतामयासिषं
॥ चकितबालकुरंगलोचनापि कुसुमसायकसायकायमानेन कटाक्षवीक्षणेन मामसकृन्निरीक्ष्य मंदमारु
तांदोलितालतेवाकंपत ॥ मनसाभिमुखैः समाकुंचितैरागलज्जांतरालवर्त्तिभिः सांगभंगिरीक्षणविशेषैर्निज
मनोवृत्तिमकथयत ॥ तत्प्रभृति चेष्टाभिरस्या मनोनुरागं समभ्यूह्य ज्ञात्वा सुखसंगमोपायमचिंतयं ॥ अन्यदा वं
धुपालः शकुनैर्भवद्गतिं प्रेक्षिष्यमाणः पुरोपांतविहारवनमयासहोपेत्य कस्मिंश्चिन्महीरुहे शकुंतवचनानि सू
रावन्निविष्ट ॥ अहमुत्कलिकाविनोदपरायणो वनांते परिभ्रमन्सरोवरतीरे चिंताक्रांतचित्तां दीनवदनां मन्मनोरथै
कभूमिं बालचंद्रिकामवलोकयं ॥ तस्याः ससंभ्रमप्रेमलज्जाकौतुककौतुकमनोरमं लीलाविलोकनसुखमनुभवन्

द० पू० सत्वावदनारविंदविषण्णभावंमदनकदनखेदानुभूतंज्ञात्वातन्निमित्तं ज्ञास्यल्लीलयातदुपकंठमुपेत्यावोचिषं।
११ सुमुखितवमुखारविंदस्यदैन्यकारणंकथयेति सारहस्यसंजातविस्रंभतयाविहायलज्जाभयेशनैरभाषत सौम्य
21 मानसारोमालवाधीशोवार्द्धकस्यप्रबलतयानिजनंदनंदर्पसारमुज्जयिन्यामभ्यषिंचत सकुमारःसप्तसागर
पर्यंतंमहीमंडलंपालयिष्यन्निजपैतृष्वस्रेयावुद्दंडकर्माणौचंडवर्मदारुवर्माणौधरणीभरणेनियुज्यतपश्चर
णायराजराजगिरिमभ्यगात राज्यंसर्वमसपत्नंशासतिचंडवर्मणिदारुवर्मामातुलाग्रजन्मनोःशासनमतिक्रम्य
पारदार्यपरद्रव्यापहरणादिदुःकर्मकुर्वाणोमन्मथसमानस्यभवतोलावण्यायत्तचित्तांमामेकदाविलोक्यकन्या
दूषणदोषंदूरीकृत्यबलात्कारेणरंतुमुद्युंक्ते। तच्चिंतयादैन्यमगच्छमिति तस्यामनोगतंमयिरागोद्रेकंमन्मनो राम०
रथसिद्ध्यंतरायंचनिशम्यबाष्पपूर्णलोचनामाश्वास्यदारुवर्मणोपायंचविचार्यवल्लभामवोचं तरुणिभवदभि ११

लाषिणां गुरुहृदयमेनं निहन्तुं मृदुरूपायः कश्चिन्मया चिन्त्यते पक्षः कश्चिद्दक्षिणयवालचंद्रिकां निवसति तदा का
रसंपदा शाम्भूरखलितहृदयो यः संबंधयोगपः साहसिको रतिमंदिरे तं पक्षं निजित्य तयेकसुरवीसमेतया समृगाक्षा
संलापामृतसुखमनुभूयति ग्गमिष्यति तेनवक्रवाकसंशयाकारपयोधरालिवाहूतीयेति सिद्धे नैकेनावादीति
पुरजनस्यपुरतो भवदीयैः सम्यग्वाकोरसकृत्कथनीयं तदनुदारुवर्मा वाक्यानीत्थं विधानि श्रावं श्रावं तत्क्षणीय
द्विभिपाल्याव्यालितहिंवरं यद्विवादोऽज्ञेनेन तया संगमम् अंगीकरिष्यति तदा समभवदीयैरित्थं वाच्यः सोमदर्पसार
वस्तुधाधिपामात्यस्य भवतोस्मिन्निवासे साहसकरणमनुचितं पौरजनस्याक्षि कं भवन्मंदिरमागता तया तया नोय
ज्ञात्वा सहकौरज्ञासुखान्यादि भविष्यसि तदा परिणीयत रूपांगीमनोरथावृत्तिविशेति सोप्येतदंगीकरिष्यति त्वंस
रवीवेषधारिणा मया सह तस्य मंदिरं गच्छ अहमेकांतनिकेतने मुष्टिजानुपादाघातैस्तं रभसात्रिहत्य पुनरपि वयस्या

द.पू.० भिषेणा भवतीमत्र निःशंकं निर्गमिष्यामि तदेनमुपायमंगीकृतवति गतसाध्वसलज्जा भवज्जनकजननी सहोदरा
११ णां पुरतश्चावयोः प्रेमातिशयमाख्याय सर्वथास्मत्परिणयकरणे तानन्नुनेयः तेपि वंशसंपन्नाय वापाधाय मन्ने
मह्यं त्वां दास्यंत्येव दारुवर्मणो मरणोपायं ते भवः कथयित्वा तेषामुत्तरमाकर्ण्ये यमत्यामिति सापि किंचिदुत्फुल्लसर
22 सिजननामामब्रवीत् सुभग क्रूरकर्मणो दारुवर्मणो भवानेव हंतुमर्हति तस्मिन्हते सर्वथास्मन्मनोरथाः
फलिष्यंति एवं क्रियतां भवदुक्तं सर्वमहमपि तथा करिष्य इति मामसकृद्धिरन्नवदना विलोकयंती मंदं मंदमगार
मगात् अहमपि बंधुपालमुपेत्य शकुनज्ञानस्मात्त्रिंशद्दिवसानंतरमेव भवत्संगमं भविष्यतीत्यश्रौषं तदनु मद
नुगम्यमानो बंधुपालो निजावासं प्रविश्य मामपि निलयाय विससर्ज सन्मायोपायगुणा[illegible]शालमंद्रेनदारुव राम०
मंगारान्तिमंदिरं तं समाहूता बालचंद्रिका तं गमिष्यंतीहूतिकां मात्रैकदृमभिप्रेषितवती अहमपि मार्गान्नृपुरमे ११

खल्लाकटककटकताटंकहारक्षौमकञ्चुलंवनितायोग्यंमंडनजातंनिगुणातयातनतस्यानेपुनिक्षिप्यसममंगी
कृतमनोज्ञवेषोवल्लभयामहृतदागारहारोपांतमगच्छं हास्यकथितास्मदागमनेनसादरंविहितान्युद्गतिता
तेनहारोपांतनिवारिताशेषपरिचरेणामदाविताबालचंद्रिकासंकेतागारमनीयत नगरव्याकुलोपकुकेयां
परोक्षद्वागारिकजनोपिकुतूहलेनदारुवर्मरागः प्रतीहारभूमिमगामत विवेकसन्यमातिरसोरागातिरेकेण
रत्नखचितहेमपर्यंकहर्म्यतलगर्भशयनमानीयततरुणीतस्यैमत्यंतमिस्नामसम्यगनवलोकितपुंभावायमतो
रमस्त्रीवेषायवचामीकरमणिमयमंडनानिसूक्ष्माणिचित्रवस्त्राणिकस्तूरिकामिलितंहरिचंदनंकर्पूरसहितं
तांबूलंसुरभीणिकुसुमानिललितवस्त्रजातंसमर्प्यमूर्त्तेर्हृदयमात्रेहासवचनैः संजल्पन्नातिष्ठत ततोरागांधत
याहमुरसीकचग्रहणोमतिव्यधत रोषारुणितोहमेतत्पर्यंकतलात्त्रिःशंकोनियात्यमुष्टिजानुपादाघातैः प्राहरं

द.प्र. निशुद्धरभसमविकलमलंकारं पूर्ववदुन्मील्य चिन्ताभयकंपितांवतांगी सुपलायन्नर्मदां दिशं गगनगासुपेतः साध्वसमर्क
१३ पितइवोत्स्वैरकृतं हा बालचंद्रिकाक्षिक्षितेन घोराकारेण पक्षेणादारुणकर्मा निहन्यते सहसा समागच्छत पश्य
तेति तदाकर्ण्य मिलिता जनाः समुद्यद्वाष्पा हा हा निनादेन दिशो बधिरयंतो बालचंद्रिकामक्षिक्षितं पक्षेवल
वंतं शृगालपिशाचरूपमीमदंष्ट्रस्तामेवायाचत तदसौ स्वकायेन कर्मणा निहतः किं तस्य विलापेनेति मिथोल
पंतः प्राविशन् कोलाहलेतस्मिन्बालचंद्रिकया महतेनेशुगपेन स निर्गतो निजावासमगात् ततो गतेषु कतिपय
दिनेषु पौरजनसमक्षं सिद्धादेशप्रकारेण विवाह्य तामिंदुमुखीं पूर्वकल्पितान्तरतविशेषान् यथेष्टमन्वभवं
वंधुपालशकुननिर्दिष्टे दिवसेऽस्मिन्निर्गत्य पुराद्बहिर्मानो नेत्रोत्सवकारि भवदवलोकनसुखमन्वभवामीति एवं मि राम०
त्रवृत्तांतं निशम्य म्लानमानसो राजवाहनः स्वस्य च सोमदत्तस्य च वृत्तांतमस्मै निवेद्य सोमदत्तं महाकालेश्वराराध १३

नानंतरंमवद्धह्ममांसपरिवारानिजकरकंप्राप्यागच्छेतिनियुज्यपुष्पोद्भवेनसेव्यमानोऽभ्रल्लगीयमानमवंतिका
पुरंविवेशः तत्रायंममस्वामिकुमारइतिबंधुपालादयोबंधुजनायंकथयित्वातेनराजगृहमनोवक्राविधामसपर्यां
कारयन्सकलकलाकुशलोमहीमहेश्वरइतिपुरिप्रकटयन्पुष्पोद्भवोमुष्पराज्ञोमज्जनभोजनादिकंअनुदिनम
मंदिरेकारयामास॥ ॥इतिदंडिनःकृतौदशकुमारचरितेपुष्पोद्भवचरितंनामचतुर्थउल्लासः॥ ॥अथमीन
केतनसेनानायकेनमलयगिरिमहीरुहनिरंतरवासिभुजंगमभुक्तावशिष्टेनेवसूक्ष्मतरेणधूतहरिचंदन
परिमलभरेणेवमंदगतिनादक्षिणानिलेनवियोगिहृदयस्थंमन्मथानलमुज्ज्वलयतासहकारकिसलय
मकरंदास्वादनरक्तकंठानांमधुकरकलकंठानांकाकलीकलकलेनदिक्चक्रंवाचालयन्मानिनीमानसोत्क
लिकामुपनयन्माकंदसिंदुवार[illegible]रक्ताशोककिंशुकतिलकेषुकलिकामुपपादयन्मदनमहोत्सवायरसिक

द॰ च॰ मनांसि समुल्लासयन्वसंतसमयः समाजगाम तस्मिन्नतिरमणीये कालेऽवंतिसुंदरी नाम मानसारनंदिनी
१४ प्रियवयस्यया बालचंद्रिकया सह नगरोपांतरम्योद्याने विहारोत्कंठया पौरसुंदरीसमवायसमन्विता कस्यचि
३५ च्चूतपोतकस्य छायाशीतले सैकततले गंधकुसुमहरिद्राक्षतचीनांबरादिनानानाविधेन परिमलद्रव्यनिक
रेण मनोभवमर्चयंती रेमे तत्र रतिप्रतिकृतिमवंतिसुंदरीं द्रष्टुकामः काम इव वसंतसहायः पुष्पोद्भवसमन्वि
तो राजवाहनस्तदुपवनं प्रविश्य नतनूतनमलयमारुतांदोलितशाखानिरंतरसमुद्भिन्नकिसलयकुसुमफ
लसमुल्लासिते पुष्पशीतलतरुषु कोकिलकीरालिकुलमधुकराणामालापाञ्श्राव्यं श्राव्यं विकसितेंदीवरक
ह्लारकैरवराजीवराजिकेलिलोलकलहंससारसकारंडवचक्रवाकचक्रवालकलरवव्याकुलविमलशीत राम॰
लसलिलललितानि सरांसि दर्शं दर्शं मंदलीलया ललनासमीपमवाप। बालचंद्रिका निःशंकमितआगम्य १४
ले

तामिनिहन्तृसंज्ञया समाहूतो निजतेजोजितपुरुहूतो राजवाहनः कृशोदर्यास्त्ववंतिसुंदर्याश्चांतिकं तगामता
वसंतसहायेन समस्तुकतया रतेः केलिशालभंजिकाविधित्सया कंचन नारीविशेषं विरच्यात्मनः क्रीडाका
सारशारदारविंदधरः सौंदर्येण पादद्वयमुद्यानवनदीर्घिकामत्तमरालिकागमनरीत्यालीलालसगतिविलासं
तूणीरलावण्येन जंघे लीलामंदिरद्वारकदलीलालित्येन मनोज्ञमुरुयुगं जैत्ररथचक्रचातुर्येण घनं जघ
नं किंचिद्विकसल्लीलावतंसकल्हारकोरककोटरानुवृत्त्या गंगावर्त्तसनाभिं नाभिं सोधारोहणपरिपाटया
वलित्रयं मौर्वीमधुकरपंक्त्या नीलिमलीलया रोमावलिं पूर्णसुवर्णकलशशोभया कुचद्वंद्वं लतामंडपसौ
कुमार्येण बाहू जयशंखाभिख्यया कंठं कामिनीकर्णपूरसहकारपल्लवरागेण प्रतिबिंबीकृतबिंबं दनच्छ
दं बाणायमानपुष्पलावण्येन शुचिस्मितं अग्रदूतिकाकलकंठिकाकलालापमाधुर्येण वचनजातं सकलसैनि

द॰पू॰ कृतायकमलयमारुतसौरभ्येण निश्वासपवनं जयध्वजमीनदर्पेण लोचनयुगलं चापयष्टिश्रिया भ्रूलते स्व
१५ च्छन्दः सुधाकरस्यापनीतकलंकया कांत्या वदनं॰ लीलामयूरबर्हभंग्या केशपाशं च विधाय समस्तमक
25 रंदकस्तूरिकासंमिलितेन मलयजरसेन प्रक्षाल्य कर्पूरपरागेणासंमृज्य निर्मितेव रराज सा मूर्तिमती व लक्ष्मी
मांलवेशकन्यका स्वेनैवाराध्यमानं संकल्पितवरप्रदानायाविर्भूतं मूर्तिमंतं मन्मथमिव तमालोक्य मंदमारु
तांदोलिता लतेव मदनावेशवतीव कंपा तदनु क्रीडाविश्रंभान्निवृत्ता लज्जया कानिकान्यपि भावांतराणि व्य
धत्त ललनाजनं सृजता विधात्रा नूनमेषा घुणाक्षरन्यायेन निर्मिता नोचेदब्जभूरेवंविधनिर्माणनिपुणो यदि
स्यात्तर्हि तत्समानलावण्यामन्यां तरुणीं किं न करोतीति सविस्मयानुरागं विलोकयतस्तस्य समक्षं स्थातुं रामं॰
लज्जिता सा किंचित्सखीजनांतरितगात्रा तन्नयनाभिमुखैः किंचिदाकुंचितैरंचितभ्रूलतैरपांगवीक्षितैरात्म १५

नःकुरंगस्यानीयमानलावण्यराजगृहं तं विलोकयंत्या निश्चित सोपि तस्याः स्नेहोत्पादितभावरसां तां स्वामग्रा
लस्तबलस्य बविषमशरशरव्यायमाणमानसो बभूव सा मनसीत्थमचिंतयत् अनन्यसाधारणसौंदर्येणा
नेन कस्यां पुरि भाग्यवतीनां तरुणीनां लोचनोत्सवः क्रियते पुरंदरस्त्रैणानुना पुरंध्रीणां पुत्रवतीनां मिमंति
नीनां कानाम सीमंतमौक्तिकी क्रियते कास्य देवी किमत्राकारणाकारणमस्य मन्मथो मामपहसितनित
लावण्यमेतं विलोकयंतीमस्त्रययेवाति मात्रेमशूत्रिजनाम सान्वयं करोति किं करोमि कथमपंज्ञातव्य इति
ततो बालचंद्रिकातयोरंतरंगहृत्रिभावविवेके ज्ञीत्वा कांतासमाजमस्त्रिधौ राजनंदनां हंतस्य समग्रगारवान
मनुचिंतमिति लोकसाधारणौ वांक्येरभाषत। भर्तृदारिके ज्यमकलंकलोपवीणो देवतासाविध्यकरणाश्चा
हवनिपुणो भ्रमरकुमारो मणिमंत्रौषधज्ञः परिचर्याहो भवत्या पंज्ञातामिति तदाकर्ण्य निजमनोरथमनुव

द॰पू॰ १६ 26 दृष्ट्वा बालचंद्रिकया संतुष्टांतरंगा तरंगावली मंदानिलेनेव संकल्पजेनाकुलीकृता राजकन्या जितमारं कुमारं समु
चितासनासीनं विधाय सखीहस्तेन शस्तेन गंधकुसुमाक्षतघनसारतांबूलादिनानावस्तुनिचयेन पूजां तस्मै का
रयामास राजवाहनोप्येवमचिंतयत् नूनमेषा पूर्वजन्मनि मे जाया यज्ञवती नो चेदेतस्यामेवंविधोनुरागो मन्मन
सि न जायेत शापावसानसमये तपोनिधेर्जातिस्मरत्वमावयोः समानमेव तथापि कालजनितविशेषसूचकवा
क्यैरस्याज्ञानमुत्पादयिष्यामि तस्मिन्नेव समये कोपि मनोरमो राजहंसः केलीविधित्सया तदुपकंठमगमत्
समुत्सुकया राजकन्यया मरालग्रहणे नियुक्तां बालचंद्रिकामवलोक्य समुचितो वाक्यावसर एष इति संभाष
णनिपुणो राजवाहनः सलीलमलपत् सखि पुरा शांबो नाम कश्चिन्महीवल्लभः मनोवल्लभया सह विहारवां राम॰
याकमलाकरम वाप्यंतरे कोकनदकदंबसमीपे निद्राधीनमानसं राजहंसं शनैर्गृहीत्वा बिसगुणेन तस्य चरणाबु १६

गलं निगडयित्वा कांतामुखं सानुरागं विलोकयन् मंदस्मितविकसितैककपोलमंडलस्तामभाषत इंदुमुखि मया
बद्धो मरालः शांतो मुनिवदास्तेऽद्य ध्याने न गम्यतामिति सोपि राजहंसः सांबमशापत महीपाल यदस्मिन्भुज
खंडे कुंठनपाशयंत्रणपापरमानंदेनातिष्ठं तन्नैष्टिकं मामकारणं गत्वा वैराग्यवशानिकटवानक्षितदेनत्वापन्नात्मरमणी
विरहसंतापमनुभवेति विषण्णवदनः शांबो जीवितेश्वरीविरहमसहिष्णुर्मूर्च्छितो दंडवत्तद्ग्राम्यसविनयमभाषत· म
हाभाग यदज्ञानेनाकरवं तत्क्षमस्वेति सतापसः करुणाक्रष्टचेताः समवदत् राजविहङ्गजन्मनि भवतः शापफ
लाभावो भवतु महद्वनस्यामोघतया भाविनि जनने शारीरांतरंगतायाः स्वस्याः सरसितायाः सारसेन सुहृदृन्दे हृदयम
ञ्जरागयुगलबंधनकारितया मामहृदयं शृंखलविगडितचरणोरमणीवियोगविषादमनुभूय पश्चादनेककालेन
ज्ञमयामस्यशाज्जस्तत्वं लभस्वेति तदनु जातिस्मरत्वमपि तयोरनुगृहाण तस्मान्मरालबंधनं कारणीयं त्वयेति सा

द॰पू॰ पि भर्तृदारिकां तद्वचनाकर्णनाभिज्ञा तस्य पुरातनजननवृत्तान्तं तातमयं मत्प्राणवल्लभ इति मनसि जानती रागपल्ल
१७ वितमानसा समन्दहासमवोचत् सौम्य पुरा सांबो यज्ञवतीसंदेशपरिपालनाय तथाविधं हंसबंधनमकार्षीत् त
था हि लोकपंडिताश्च पि दाक्षिण्येनाकार्यं कुर्वन्ति। कन्याकुमारावन्योन्यपुरातनजनननामधेयपरिचितैः पर
स्परज्ञानाय यथाभिज्ञमुक्त्वा मनोजरागपूर्णमानसौ बभूवतुः तस्मिन्नवसरे मालवेन्द्रमहिषी परिजनपरिवृता दु
हितृकेलीविलोकनाय तं देशमवाप। बालचंद्रिका तां विलोक्य ससंभ्रमं रहस्यनिर्भेदभिया हस्तसंज्ञया पुष्पोद्भ
वसेव्यमानं राजवाहनं वृक्षवाटिकान्तरितगात्रमकरोत् सा मानसारमहिषी सखीसमेताया दुहितुर्नानाविधां
विहारलीलामनुभवन्ती क्षणं स्थित्वा निजागारगमनायोद्युक्ता बभूव मातरमनुगच्छन्त्यवन्तिसुन्दरी राजहंसकुल राम॰
तिलक विहारवाञ्छया केलीवने मदन्तिकमागतं भवन्तमकाण्ड एव विसृज्य मया समुचितमिति जनन्यनुगमनं क्रि १७

यतेतद्देनेनभवन्मनोऽनुरागोऽन्यथामाभूदितिनिमराल्लमिवकुमारस्तुहिंशपमस्तुचित्तालापकलापंवदंतीपुनःपुनःपरि
हन्नदीननयनावदनंविलोकयंतीनिजमंदिरमगात् तत्रहृदयवल्लभकथाप्रसंगेबालचंद्रिकाकथिततद्देवय
नामधेयामन्मथबाणायतनव्याकुलमानसाविरहवेदनयाबहुलपक्षशशिकलेवकृशामक्षामाहारादिसक
लव्यापारंपरित्यज्यतारहस्यमंदिरेमलयजरसक्षालितपल्लवकुसुमकल्पिततल्पतलायत्ततनुलताबभूव तत्र
तथाविधामवस्थामनुभवंतीमन्मथानलसंतप्तांसुकुमारींकुमारींनिरीक्ष्यखिन्नोवयस्यागणाःकांचनकलश
संचितानिहरिचंदनोशीरघनसारमिलितानितदभिषेककल्पितानिसलिलानिबिसतंतुमयानिवासांसि
चनलिनीदलमयानितालवृंतानिचसंतापहरणानिबहूनिसंपाद्यतस्याःशरीरमाशिशिरयन् तदपिशीतलो
पचरणंसलिलमिवतप्तेतैलेतदंगेदहनमेवसमंतादाविश्चकार किंकर्तव्यतामूढांविषण्णांबालचंद्रिकामीषद

र·प्र० मिलितेन कटाक्षवीक्षितेन बाष्पकणाकुलेन विलोक्य विरहानलोष्मनिःश्वासमालपिताधरया नतांग्या शनैः स
१७ गद्गदं व्यलापि प्रियसखि कामः कुसुमायुधः पंचबाण इति नूनमसत्यमुच्यते इयमहमसंख्यैरिषुभि
रनेन हन्ये सखि चंद्रमसं वडवानलादपि तापकरं मन्ये यदस्मिन्नंतः प्रविशति शुष्यति पारावारः सति निर्गते
च दैव वर्द्धते दोषाकरस्य दुःकर्म किं वर्ण्यते मया यदनेन निजसहोदर्याः पद्मालयायाः गेहभूतमपि कमलं
विहन्यते विरहानलसंतप्तहृदयस्पर्शेन नूनमुष्णीकृतः स्वल्पीभवति मलयानिलः नवपल्लवकल्पितं त
ल्पमिदमनंगाग्निशिखापटलमिव संतापं तनोति हरिचंदनमपि भुजगनिजयापि संश्लेषवदुरगरद
नालिप्तोल्वणगरलसंकलितमिव तापयति शरीरं तस्मादलमलमायासेन शीतलोपचारेणापराजित राम०
मन्मथो राजकुमारस्य वागदंकारो मन्मथज्वरापहरणे सोपि लब्धुमशक्यो मया किं करोमीति बालचंद्रिका १७

मनोजन्मनावस्थापरमकाष्ठां गतां कोमलांगीं तां राजवाहनलावण्याधीनमानसामनन्यशरणामवेक्ष्यात्मन्य
चिंतयत् कुमारः सत्वरमानेन चोमयानोचे देवतां स्मरणीयो गतिं नयिष्यति मीनकेतनः तत्रोद्याने कुमारयो
रन्योन्यावलोकनवेलायामसायकः समं मुक्तसायकोऽभूत् तत्कुमारानयनं सुकरं ततोवंतिसुंदरीरकुमारा
यसमयोचितकरणीयचतुरं सखीगणं नियुज्य राजकुमारमंदिरमगात् पुष्पबाणबाणतूणीरायमानमा
नसोतंगतज्ञावयवसंपर्कपरिम्लानपल्लवशयनमधिष्ठितो राजवाहनः प्राणेश्वरीमुद्दिश्य समहर्षमुत्थो इवे
नसंलपन्नागतां प्रियवयस्यालोक्य यादसूलमन्वेषणीपालनेव बालचंद्रिकागतेति संतुष्टमनाः निटिलतट
संघटीभवदंबुजकोरककांतिलसदंजलिपुटमभितो निषीदेति निर्दिष्टसमुचितासनासीनामवंतिसुंदरीप्रेषि
तसकर्पूरं तांबूलं वितरंतीं तां कांतावृत्तांतमपृच्छत् तया सविनयमभाणि देव क्रीडावने भवदवलोकनका

द॰कु॰ त्समारम्भमल्पमथमथ्यमानातुषारतल्पादिभिस्तापशमनमलभ्यवतीवामनेनेवोन्नततरुफलमलभ्यं त्वदुरःस्थला
१९ लिंगनसौख्यमसंशयं तयालिङ्ग्य स्वयमेव पत्रिकामालिख्य वल्लभायै तामर्पयेति मां नियुक्तवती। राजकु
मारः पत्रिकान्तामादाय पपाठ। सुभग कुसुमसुकुमारं जगदनवद्यं विलोक्य ते रूपं। मम मानसमभिलषति
त्वं चित्तं कुरु तथा मृदुलं। इति पठित्वा सादरमभाषत। सखि छायावन्मामनुवर्तमानस्य पुष्पोद्भवस्य वल्लभा
त्वमेव तस्या मृगीदृशो बहिश्चराः प्राणा इव वर्तसे। त्वच्चातुर्यमस्यां क्रियायामालवालमभूत्। तदविलंक
रिष्यामि तत्तां प्राणसमानः। कांचित्समाख्याते यदा केलीवने कुरंगनयनालोचनपथमवतीर्णेन तदैवापहृत
मदीयमानसा सा स्वमंदिरमगात्। सा चेतसो माधुर्यकाठिन्ये स्वयमेव जानाति। दुःकरं कन्यांतःपुरप्रवेशः। त राम॰
दन्तरूपमुपायमुपपाद्य श्वः परश्वो वा तां संगमिष्यामि। मदुदन्तमेवमाख्याय शिरीषकुसुमसुकुमाराया १९

या शरीरबाधा न जायेत तथाविधमुपायमाचरेति । बालचंद्रिकापि तस्य प्रेमगर्भितं वचनमाकर्ण्य संतुष्टा क-
न्यापुरमगच्छत् । राजवाहनोपि प्रियाहृदयवल्लभावलोकनसुखमलभमानस्तु घ्राणं विरहविनोदाय पुष्पोद्-
वनमाजगाम । तत्र चकोरलोचनाविचितपल्लवकुसुमनिकुरुंबं महीरुहसमूहं शारदिंदुमुख्यामन्म-
थसमाराधनस्थानं वनतांगीपदपंक्तिविहितं शीतलसैकततलं च सुदतीभुक्तमुक्तं माधवीलतामंडपांतर-
पल्लवतल्पं च विलोकयन् ललनातिलकाविलोकनवेलाजनितशोषाशिस्मारं स्मारं मंदमारुतकंपितानि न-
वनपल्लवानि मदनाग्निशिखा इव वीक्षितो दर्शं दर्शं मनोजकरेणीजपानामिव कोकिलकीरमधुकरारागं क-
णितानि श्रावं श्रावं मारविकारेणाक्रांचिदपावस्थान्तमसहिष्णुः परिबभ्राम । तस्मिन्नवसरे धरणीसुर एकः स्ना-
नार्थं निवसनः स्फुरन्मणिकुंडलमंडितो मुंडितमस्तकमानवसमेतस्त्वस्तुरवेषमनोरमो यदृच्छया समागतः

२.पू. समंततोऽभ्युन्नसन्नेजोमंडलं राजवाहनमाशीर्वादपूर्वकं ददर्श। राजा सादरं कोभवान् कस्यां विद्यायां निपुण इति तं प
३० प्रच्छ स च विद्येश्वरनामधेयोऽहमैंद्रजालिकविद्याकोविदो विविधदेशेषु राजमनोरंजनाय भ्रमन्नुज्जयिनीमद्याग
30 तोस्मीति शशंस १३ पुनरपि राजवाहनं समवलोक्यास्यां लीलावनीपांडुरतानिमित्तं किमिति साभिप्रायं विहस्या
पृच्छत् पुष्पोद्भवस्त्वैंद्रजालिके निजकार्यकरणं तर्कयन्नेनमादरेणाबभाषे ननु सततमस्मत्संभाषणपूर्वतया
चिरं रुचिरभाषणो भगवानस्माकं प्रियवयस्यो जातः सुहृदामकथ्यं च किमस्ति केलीवनेस्मिन्वसंतमहोत्सवायाग
तायां मालवेंद्रसुतायां राजनंदनस्यास्य चाकस्मिकसंदर्शनेऽन्योन्यानुरागातिरेकः समजायत सततसंभोगसिद्ध्यु
पायाभावे नासाचीदृशीमवस्थामनुभवतीति। विद्येश्वरो लज्जाभिरामं राजकुमारमुखमभिवीक्ष्याविरचितमंद राम०
हासो व्याजहार देव भवदनुचरे मयि तिष्ठति तव कार्यमसाध्यं किमस्ति अहमिंद्रजालविद्यया मालवेंद्रं मोहय ३०

नैरोरजनसमक्षमेतत्तनयापरिणायं रचयित्वा कन्यांतःपुरंप्रवेशं करिष्यामीति इत्थं तत एव राजकन्यायै सर्वा सुखे
न सर्वमेव कथयितव्यमिति संतुष्टमना महीपतिरनिमित्तं मित्रं प्रकटीकृतकृत्रिमक्रियापाटवं विप्रलंभमहा
मपेमसहजस्नेहाईवेदितं तं विद्येश्वरं सबहुमानं विससर्ज अथ राजवाहनो विद्येश्वरस्य क्रियापाटवेन फलित
मिव मनोरथं मन्यमानः पुष्पोद्भवेन सह स्वमंदिरमुपेत्य सादरं बालचंद्रिकामुखेन निजवल्लभायै महीसुरक्रिय
मागामिसंगमोपायं वेदयित्वा कौतुकाकृष्टहृदयः कथमिमां रूपां रूपयामीत्यतिष्ठत् परेद्युः प्रभाते विद्येश्वरो रस
भावरीतिगतिचतुरस्तादृशेन महता निजपरिजनेन सह राजभवनद्वारांतिकमुपेत्य दौवारिकनिवेदितनिजवृत्तांतः
सहसोपगम्य सप्रणाममैंद्रजालिकः समागत इति द्वास्थैर्विज्ञापितेन तद्दर्शनकुतूहलाविष्टेन ससुतस्तुकावरोध
सहितेन मालवेंद्रेण समाहूयमानो विद्येश्वरः कक्ष्यांतरं प्रविश्य सविनयमाशिषं दत्वा तदनुज्ञातः परिजनताड्यमाने

द॰कु॰ ३१ षु वाद्येषु नदत्सु गायकीषु मंदकलकोकिलामंजुलध्वनिषु समधिकरागरंजितसामाजिकमनोहारिषु पिच्छिकाध्म
णेषु सपरिवारं परिहृष्टं भ्रामयत्सु कुलितनयनः कृष्णमतिष्ठत् तदनु विषमं विषमुल्बणं वमंतः फणालंकरणारत्न
राजिनीराजितराजसंहिता भोगाभोगिनो भयं जनयंतो निश्चेरुः एवमाश्चर्यमहत्कंडैरहिपतीनादाय दिवि समाचरत्
ततोऽग्रजन्मा नरसिंहस्य हिरण्यकशिपोर्दैत्येश्वरस्य विदारणमभिनीय महदाश्चर्यान्वितं राजानमभाषत राजन्
वसान समये भवता शुभस्त्वं चक्रं द्रष्टुमुचितं ततः कल्याणपरंपरावाप्तये भवदात्मजाकारणायास्तस्मरणानि खिल
लक्षणोपेतस्य राजनंदनस्य विवाहः कार्य इति तदवलोकनकुतूहलेन महीपालेनानुज्ञातः स संकल्पितार्थसि
द्धिसंभावनसंफुल्लवदनः सकलमोहजनकमंजनं लोचनयोर्निक्षिप्य परितो व्यलोकयत् सर्वेषु तदैंद्रजालिकमे राम॰
वकर्मेति साकूतं पश्यत्सु राजाप्यच्छादितहृदयेन राजवाहनेन पूर्वसंकेतसमागतामनेकभूषणभूषितांगीमवंतिसुं ३१

31

द०पू० दशवैवाहिकमंत्रैस्तैरुपेताग्निसाक्षीकन्यासंयोजयामास क्रियावसाने सतीन्द्रजालपुरुषाः सर्वे गच्छंतु भवंत इति
३१ द्विजन्मनोच्चैरुच्यमाने सर्वे मायामानवा यथायथमंतर्भावं गताः राजवाहनोपि पूर्वसंकल्पितेन गूढोपायचातुर्ये
णैन्द्रजालिकपुरुषवत्कन्यान्तःपुरं प्रविवेश० मालवेंद्रोपि तदद्भुतं मन्यमानस्तस्मै वाडवाय प्रचुरतरं धनं दत्वा विद्येश्व
32 रत्वमिदानीं साधयेति तं विसृज्य स्वयमंतर्मंदिरं जगाम ततोवंतिसुंदरी प्रियसहचरीवारपरिवारा वल्लभोपेता सुं
दरीमंदिरं ययौ एवं दैवमानुषबलेन मनोरथसाफल्यमुपेतो राजवाहनः स्मरसमधुराचेष्टाभिः शनैः शनैर्हरिणलो
चनाया लज्जामपनयन्सुरतरागमुपनयन्रहोविश्रंभमुपजनयन्संलापे तदनुलापपीयूषलोलुपः सचित्रचित्रं चित्त
हारिणं चतुर्दशभुवनवृत्तान्तं श्रावयामास॥ ॥इति श्रीदंडिनः कृतौ दशकुमारचरिते पूर्वपीठिका समाप्ता॥ ॥ राम०
॥ ॥शुभमस्तु॥ ॥मंगलं चास्तु॥ ॥श्रीरस्तु॥ ॥श्रीकृष्णाय नमः॥ ॥वासुदेवाय नमः॥ ३१

काव्यदसकुमारचर्त पूर्वपीठका।
१२५

वल्ला ५
१२